# ॥ वाल्मीकि रामायण ॥

## २ अयोध्याकाण्ड

### अध्याय ६५

स प्राङ्मुखो राजगृहादभिनिर्याय वीर्यवान् ।
ह्रादिनीं दूरपारां च प्रत्यक्स्रोतस्तरङ्गिणीम् ।
शतद्रूमतरच्छ्रीमान्नदीमिक्ष्वाकुनन्दनः ॥ १ ॥

एलधाने नदीं तीर्त्वा प्राप्य चापरपर्पटान् ।
शिलामाकुर्वतीं तीर्त्वा आग्नेयं शल्यकर्तनम् ॥ २ ॥

सत्यसन्धः शुचिः श्रीमान्प्रेक्षमाणः शिलावहाम् ।
अत्ययात्स महाशैलान्वनं चैत्ररथं प्रति ॥ ३ ॥

वेगिनीं च कुलिङ्गाख्यां ह्रादिनीं पर्वतावृताम् ।
यमुनां प्राप्य सन्तीर्णो बलमाश्वासयत्तदा ॥ ४ ॥

शीतीकृत्य तु गात्राणि क्लान्तानाश्वास्य वाजिनः ।
तत्र स्नात्वा च पीत्वा च प्रायादादाय चोदकम् ॥ ५ ॥

राजपुत्रो महारण्यमनभीक्ष्णोपसेवितम् ।
भद्रो भद्रेण यानेन मारुतः खमिवात्ययात् ॥ ६ ॥

तोरणं दक्षिणार्धेन जम्बूप्रस्थमुपागमत् ।
वरूथं च ययौ रम्यं ग्रामं दशरथात्मजः ॥ ७ ॥

तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ ।
उद्यानमुज्जिहानायाः प्रियका यत्र पादपाः ॥ ८ ॥

सालांस्तु प्रियकान्प्राप्य शीघ्रानास्थाय वाजिनः ।
अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ ॥ ९ ॥

वासं कृत्वा सर्वतीर्थे तीर्त्वा चोत्तानकां नदीम् ।
अन्या नदीश्च विविधाः पार्वतीयैस्तुरङ्गमैः ॥ १० ॥

हस्तिपृष्ठकमासाद्य कुटिकाम् अत्यवर्तत ।
ततार च नरव्याघ्रो लौहित्ये स कपीवतीम् ।
एकसाले स्थाणुमतीं विनते गोमतीं नदीम् ॥ ११ ॥

कलिङ्ग नगरे चापि प्राप्य सालवनं तदा ।
भरतः क्षिप्रमागच्छत्सुपरिश्रान्तवाहनः ॥ १२ ॥

वनं च समतीत्याशु शर्वर्यामरुणोदये ।
अयोध्यां मनुना राज्ञा निर्मितां स ददर्श ह ॥ १३ ॥

तां पुरीं पुरुषव्याघ्रः सप्तरात्रोषितः पथि ।
अयोध्यामग्रतो दृष्ट्वा रथे सारथिमब्रवीत् ॥ १४ ॥

एषा नातिप्रतीता मे पुण्योद्याना यशस्विनी ।
अयोध्या दृश्यते दूरात्सारथे पाण्डुमृत्तिका ॥ १५ ॥

यज्वभिर्गुणसम्पन्नैर्ब्राह्मणैर्वेदपारगैः ।
भूयिष्ठमृष्हैराकीर्णा राजर्षिवरपालिता ॥ १६ ॥

अयोध्यायां पुराशब्दः श्रूयते तुमुलो महान् ।
समन्तान्नरनारीणां तमद्य न शृणोम्यहम् ॥ १७ ॥

उद्यानानि हि सायाह्ने क्रीडित्वोपरतैर्नरैः ।
समन्ताद्विप्रधावद्भिः प्रकाशन्ते ममान्यदा ॥ १८ ॥

तान्यद्यानुरुदन्तीव परित्यक्तानि कामिभिः ।
अरण्यभूतेव पुरी सारथे प्रतिभाति मे ॥ १९ ॥

न ह्यत्र यानैर्दृश्यन्ते न गजैर्न च वाजिभिः ।
निर्यान्तो वाभियान्तो वा नरमुख्या यथापुरम् ॥ २० ॥

अनिष्टानि च पापानि पश्यामि विविधानि च ।
निमित्तान्यमनोज्ञानि तेन सीदति ते मनः ॥ २१ ॥

द्वारेण वैजयन्तेन प्राविशच्छ्रान्तवाहनः ।
द्वाःस्थैरुत्थाय विजयं पृष्टस्तैः सहितो ययौ ॥ २२ ॥

स त्वनेकाग्रहृदयो द्वाःस्थं प्रत्यर्च्य तं जनम् ।
सूतमश्वपतेः क्लान्तमब्रवीत्तत्र राघवः ॥ २३ ॥

श्रुता नो यादृशाः पूर्वं नृपतीनां विनाशने ।
आकारास्तानहं सर्वानिह पश्यामि सारथे ॥ २४ ॥

मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानपरं कृशम् ।
सस्त्री पुंसं च पश्यामि जनमुत्कण्ठितं पुरे ॥ २५ ॥

इत्येवमुक्त्वा भरतः सूतं तं दीनमानसः ।
तान्यनिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ ॥ २६॥

तां शून्यशृङ्गाटकवेश्मरथ्यां
रजोऽरुणद्वारकपाटयन्त्राम् ।
दृष्ट्वा पुरीमिन्द्रपुरी प्रकाशां
दुःखेन सम्पूर्णतरो बभूव ॥ २७॥

बहूनि पश्यन्मनसोऽप्रियाणि
यान्यन्न्यदा नास्य पुरे बभूवुः ।
अवाक्षिरा दीनमना नहृष्टः
पितुर्महात्मा प्रविवेश वेश्म ॥ २८॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com